# ॥ श्री मध्वकवचम् ॥

ध्यानम्

अस्य श्रीमध्वकवचस्य त्कृजु त्कृषिः । त्रिष्टुप् छंदः । मध्वो देवता ॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शतमित्यमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वतीयं वपु–
र्मध्वो यत्तु तृतीयमेतदमुना ग्रंथः कृतः केशवे ॥

– इति ध्यानम्

श्रीमध्वः पूर्वतः पातु दक्षिणे ज्ञानदस्तथा ।
पश्चिमे पूर्णबोधस्तु उत्तरे विबुधोत्तमः ॥ १ ॥

उपरिष्टाच्च तत्त्वज्ञो ह्याधस्तात् सुरसंयमी ।

अंतरानंदतीर्थो मे बहिर्ध्वस्तदुरागमः ॥ २ ॥

समंताद्वायुदेवो मे शिरः सुरशिरोमणिः ।
शिखां यतीश्वरः पातु जितवादी तु मे मुखम् ॥ ३ ॥

मस्तकं मारुतपतिर्भ्रूवौ भक्तिमहार्णवः ।
नेत्रे दशमतिः पातु कर्णौ ज्ञानिजनप्रियः ॥ ४ ॥

कपोलौ तु विरगी मे नासिकां च महाद्युतिः ।
जिह्वास्थिदंतपंक्तीर्मे प्राणस्तालुं महाबलः ॥ ५ ॥

ओष्टौ गुरुर्हनुं सत्यधर्मा कंटः सदा त्कृजुः ।
स्कंधौ विजितदुर्वादी भुजौ सम्बाष्यकारकः ॥ ६ ॥

हस्तौ दशमतिः पाणितले सत्यासुतप्रियः ।
अंगुलीः पातु शत्रामा नखान् सुखमुनिस्तथा ॥ ७ ॥

स्वांतस्थानंतशयनो वक्षः कुक्षिममंदधीः ।
कृष्णसंस्थापको नाभिं कटिं विष्णुपदोत्सुखः ॥ ८ ॥

पायुमीशेश्वरः पातु तत्सखायं जितेंद्रियः ।
ऊरू दैत्योरुविध्वंसी पूर्णार्थो जानुनी मम ॥ ९ ॥

अनंतार्थस्तथा जंघे पादौ सुजनहृंगुहः ।
प्रपदौ दुरितौधंधुः तत्पार्ष्णि पातु तीर्थकृत् ॥ १० ॥

तन्नखान् दैत्यदर्पघः सर्वांगानि सुखप्रदः ।
भविष्यद्ब्रह्मा रोमाणि स्वपितृत्कृणमोचकः ॥ ११ ॥

बुद्धिं शुद्धांतरः पातु मनो मुनिजनप्रियः ।
सर्वदा सर्वतः पातु सुखतीर्थः सदाऽधिकः ॥ १२ ॥

इत्येतन्मध्वकवचं सुखज्ञानादिसत्फलम् ।
पठन् प्रयन्ततः काले प्रयाति प्रीतिमस्य तु ॥ १३ ॥

इति श्रीलिकुच नारायणपंडिताचार्यविरचितं श्रीमध्वकवचं ।

॥ भारतीरमणमुख्यप्राणांतर्गत श्री कृणार्पणमस्तु ॥